| नामांक | | | Roll No. | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions — 11

No. of Printed Pages — 7

# SS—12–1—Sans. Sah. I

## उच्च माध्यमिक परीक्षा, 2011

## Senior Secondary Examination - 2011

**वैकल्पिक वर्ग I** ( Optional Group I — HUMANITIES )

**संस्कृत साहित्यम् — प्रथम पत्रम्**

**( SANSKRIT SAHITYA — First Paper )**

समय : $3\frac{1}{4}$ घण्टे

पूर्णांक : 60

**परीक्षार्थिभ्यः सामान्यनिर्देशाः**

(1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्कः अनिवार्यतः लेख्यः ।

(2) सर्वे प्रश्नाः अनिवार्याः ।

(3) प्रत्येकं प्रश्नस्योत्तरमुत्तरपुस्तिकायामेव देयम् ।

(4) प्रत्येकं प्रश्नभागस्योत्तरं क्रमानुसारमेकत्रैव लेखितव्यम् ।

(5) प्रथमप्रश्नस्य चत्वारः ( i, ii, iii एवं iv ) भागाः सन्ति । प्रत्येकं भागस्य उत्तरस्य चत्वारः ( **अ, ब, स** एवं **द** ) विकल्पाः सन्ति । समुचितविकल्पस्य उत्तराक्षराणि उत्तरपुस्तिकायां निम्नलिखिततालिकां निर्माय एकस्मिन् स्थाने एव लेखनीयानि ।

| प्रश्न क्रमाङ्कः | समुचित उत्तराक्षरम् |
|---|---|
| 1. (i) | |
| 1. (ii) | |
| 1. (iii) | |
| 1. (iv) | |

1. (i) 'दृढ़मपहृता कन्या भूयो मया न च रक्षिता' पद्यांशे प्रयुक्तं छन्दः वर्तते —

(अ) शिखरिणी (ब) वसन्ततिलका

(स) हरिणी (द) मन्द्राक्रान्ता । $\frac{1}{2}$

(ii) अन्तगुरुः भवति —

(अ) भगणः (ब) सगणः

(स) तगणः (द) जगणः । $\frac{1}{2}$

(iii) स्वरव्यञ्जनसंहतेः क्रमेण आवृत्तिः भवति —

(अ) यमके (ब) उत्प्रेक्षायाम्

(स) अर्थान्तरन्यासे (द) दीपके । $\frac{1}{2}$

(iv) अतिशयचारुतयां वस्तुनः यथावद् वर्णतं क्रियते तत्रालङ्कारो विद्यते —

(अ) भ्रान्तिमान् (ब) सन्देहः

(स) तुल्ययोगिता (द) स्वभावोक्तिः । $\frac{1}{2}$

2. अधोलिखित श्लोकयोः एकस्य श्लोकस्य छन्दसः नामोल्लेखं कुरुत — 1

(क) विपदि धैर्यमथाभ्युदये क्षमा,
सदसि वाक्पटुता युधि विक्रमः ।
यशसि चाभिरुचिर्व्यसनं श्रुतौ,
प्रकृतिसिद्धमिदं हि महात्मनाम् ॥

(ख) फलं स्वेच्छालभ्यं प्रतिवनमखेदं क्षितिरुहाम् ,
पयः स्थाने स्थाने शिशिरमधुरं पुण्यसरिताम् ।
मृदुस्पर्शा शय्या सुललितलता पल्लवमयी,
सहन्ते सन्तापं तदपि धनिनां द्वारि कृपणाः ॥

3. अधोलिखित श्लोके अलङ्कारनामोल्लेखं कुरुत — 1

बृहत्सहायः कार्यान्तं क्षोदीयानपि गच्छति ।
सम्भूयाम्भोधिमभ्येति, महानद्या नगापगाः ॥

4. अधोलिखित चतुर्षु पद्येषु कयोश्चिद् **द्वयोः** हिन्दीभाषायां सप्रसंगं व्याख्या कार्या — ( 1 + 3 ) × 2 = 8

(अ) सत्यमेव जयते नानृतं, सत्येन पन्था विततो देवयान: ।
येनाक्रमन्त्यृषयो ह्याप्तकामा: यत्र तत् सत्यस्य परमं निधानम् ॥

(आ) मृदुव्यवहितं तेजो भोक्तुमर्थान्प्रकल्पते ।
प्रदीप: स्नेहमादत्ते दशयाभ्यन्तरस्थया ॥

(इ) श्रिय: कुरूणामधिपस्य पालनीं
प्रजासु वृत्तिं यमयुङ्क्त वेदितुम् ।
स वर्णिलिङ्गी विदित: समाययौ
युधिष्ठिरं द्वैतवने वनेचर: ॥

(ई) प्रतिष्ठा चेत्काम्या यदि च हृदये शासनरुचि -
र्विधेयश्चेद् धर्मो यदि च सुरलोकोत्सवमति: ।
समाराध्या देवा यदि च परमे ब्रह्मणि लयो,
मनोऽभीष्टस्तर्हि व्रजत परमोद्योगशरणम् ॥

5. निम्नाङ्कितेषु चतुर्षु कयोश्चिद् **द्वयोः** श्लोकयो: संस्कृतभाषायां सप्रसंगं व्याख्या करणीया — ( 1 + 3 ) × 2 = 8

(क) आचार्यो ब्रह्मणो मूर्ति:, पिता मूर्ति: प्रजापते: ।
माता पृथिव्या: मूर्तिस्तु भ्राता स्वो मूर्तिरात्मन: ॥

(ख) मन्त्रो विजयमूलं हि राज्ञां भवति राघव ।
सुसंवृतो मन्त्रिधुरैरमात्यै: शास्त्रकोविदै: ॥

(ग) जयन्ति ते सुकृतिनो रससिद्धा: कवीश्वरा: ।
नास्ति येषां यश: काये जरामरणजं भयम् ॥

(घ) संगच्छध्वं संवदध्वं सं वो मनांसि जानताम् ।
देवा भागं यथा पूर्वे संजानाना उपासते ॥

6. अधोलिखितेषु केषाञ्चित् **चतुर्णां** प्रश्नानामुत्तराणि संस्कृतभाषायां लिखत — 4 × 2 = 8

(i) 'वेदोपदेश:' पाठानुसारेण वयं कान् जहाम ?

(ii) 'आचार: परमो धर्म:' पाठाधारेण काम: केषाम् उपभोगेन न शाम्यति ?

(iii) 'रामपृष्टकुशलप्रश्ना:' पाठानुसारेण अमात्य: कै: गुणै: युक्त: भवेत् ?

(iv) ''मानुष्याद् देवतां गता:' पाठाधारेण केन विना दैवं न सिद्ध्यति ?

(v) 'दिलीपस्य गो-सेवा' पाठानुसारेण पतङ्गस्य प्रभा दिनान्ते कुत्र गन्तुं प्रचक्रमे ?

(vi) 'उद्धव-उक्तय:' इति पाठ: कस्मात् ग्रन्थात् संकलित: ? रचनाकारस्य नामापि लेखनीयम् ।

(vii) 'नीति-वचनानि' पाठाधारेण सन्मित्रस्य लक्षणद्वयं लिखत ।

(viii) 'द्रौपद्या: मन्यु व्यवसायदीपिनी गिर:' पाठानुसारेण मुनय: केन सिद्धिं प्राप्नुवन्ति ?

7. अधोलिखितेषु चतुर्षु कयोश्चिद् **द्वयोः** नाट्यांशयोः हिन्दीभाषायां सप्रसंगं व्याख्या कार्या —
( 1 + 4 ) × 2 = 10

(अ) शकुनिः — ( सोद्वेगम् ) मा तावद् भोः ! अयुक्तेयं धर्मवञ्चना ।

द्रोणः — कथं धर्मवञ्चनेति । तावद् भो गान्धार विषय-विस्मित ! शकुने ! त्वदनार्यभावात् सर्वलोकमनार्यमिति मन्यसे ।

भीष्मः — पौत्र ! दुर्योधन ! अवभृथस्नानमात्रमेव खलु तावत् ? मित्रमुखस्य शत्रोः शकुनेर्वचनं न श्रोतव्यम् ।

द्रोणः — ( आत्मगम् ) सान्त्वं हि नाम दुर्विनीतानामौषधम् ।

( प्रकाशम् ) अहं तव प्रभावी ननु ।

दुर्योधनः — न ममैव, कुलस्यापि मे भवान् प्रभुः ।

द्रोणः — एतत् तवैव युक्तम् । तत् पुत्र !

(आ) प्रथमा — शृणोतु महाराजः । एषा अपराजिता नामौवधिरस्य जातकर्मसमये भगवता मारीचेन दत्ता । एतां किल मातापितरावात्मानं च परित्यज्याऽपरो भूमिपतितां न गृह्णाति ।

राजा — अथ गृह्णाति ?

प्रथमा — ततस्तं सर्पो भूत्वा दशति ।

राजा — भवतीभ्यां कदाचिदस्याः प्रत्यक्षीकृता विक्रियाः ?

उभे — अनेकशः ।

राजा — ( सहर्षम् आत्मगतम् ) कथमिव सम्पूर्णमपि मे मनोरथं नाभिनन्दामि ?

( इति बालं परिष्वजते )

द्वितीया — सुव्रते, एहि । इमं वृत्तान्तं नियमव्यापृतायै शकुन्तलायै निवेदयावः ।

( इति निष्क्रान्ते )

बालः — मुञ्च माम् । यावन्मातुः सकाशं गमिष्यामि ।

(इ) शङ्खचूडः — महात्मन् नैवं सम्भवति । ( मातुरग्रतो जानुभ्यां स्थित्वा ) अम्ब ! त्वमपि निवर्तस्व इदानीम् ।

वृद्धा — ( सास्रम् ) पुत्रक ! न खलु त्वामुज्झित्वा मे पादावन्यतो वहतः ।

शंखचूडः — ( उत्थाय ) यावदहमप्यदूरे भगवन्तं दक्षिणगोकर्णं प्रदक्षिणीकृत्य स्वाम्यादेशम् अनुतिष्ठामि । ( उभौ निष्क्रान्तौ )

नायकः — कष्टम् । न सम्पन्नमभिलषितम् । तत् कोऽत्राभ्युपायः ?

कंचुकी — ( तरसा प्रविश्य ) इदं वासोयुगम् ।

नायकः — ( दृष्ट्वा सहर्षमात्मगतम् ) दिष्ट्या सिद्धमभिलषितमनेना-तर्कितोपनतेन रक्तांशुकयुगलेन । ( वासयुगलं गृहीत्वा आत्मगतम् ) सफलीभूतो मे मलयवत्याः पाणिग्रहः । ( प्रकाशम् ) कंचुकिन् ! गम्यतां, मद्वच नाद् अभिवादनीया देवी ।

कंचुकी — यदाज्ञापयति कुमारः । ( इति निष्क्रान्तः )

(ई) भामाशाहः — ( सविनयम् ) महाराज ! न अहम् अपमानं करोमि । का तुच्छसेवके शक्तिः यया असौ तथा दुःसाहसं कुर्यात् । गृह्यतां महाराज ! गृह्यताम् । देशधर्मयोः रक्षा विधीयताम् ।

प्रतापः — ( सहर्षम् आदाय ) धन्यः असि मन्त्रिवर्य ! धन्यः । त्वदीया जननी धन्या । कथ्यतां तु अभिन्नहृदय ! अस्यां कियती सम्पत्तिः ?

भामाशाहः — ( प्रसन्नमुखः प्रणम्य ) महाराज ! इयती एव स्वल्पतमा यद् अनया द्वादशवर्षाणि यावत् पञ्चविंशतिसहस्रसैनिकाः सहर्षं योद्धुं शक्नुवन्ति ।

प्रतापः — अहो तदा तु किं कथनीयम् ? महत्कार्यं सेत्स्यति अनया ( सर्वान् सम्बोध्य ) अद्य अस्मात् एव क्षणात् राणा स्वदेशस्य पारतन्त्र्यशृंखलाः त्रोटयितुं शत्रून् संहारयितुं धर्मं रक्षयितुं च योत्स्यते, योत्स्यते अवश्यं योत्स्यते ( भामाशाहम् अभिलक्ष्य ) धन्योऽसि मित्र ! धन्यः । एहि त्वां गाढम् आलिङ्गितुमभिलषामि ।

8. अधोलिखितेषु चतुर्षु **द्वयोः** संस्कृतभाषायां सप्रसंगं व्याख्या कार्या — ( 1 + 3 ) × 2 = 8

(क) सिद्धार्थकः — भदन्त, वन्दे ।

क्षपणकः — श्रावक धर्मसिद्धिर्भवतु । ( निर्वर्ण्य ) श्रावक ! प्रस्थानसमुद्वहने कृतव्यवसायमिव त्वां पश्यामि ।

सिद्धार्थकः — ज्ञातं भदन्तेन । देशान्तरं प्रस्थितोऽस्मि । तस्मात् कथयतु भदन्त कीदृशोऽद्य दिवस इति ।

क्षपणकः — ( विहस्य ) श्रावक ! मुण्डितमुण्डो नक्षत्राणि पृच्छ ।

सिद्धार्थकः — भदन्त, साम्प्रतमपि किं जातम् । कथय प्रस्थानस्य यद्यनुकूलं भविष्यति तदा गमिष्यामि ।

क्षपणकः — श्रावक, न साम्प्रतमेतस्मिन्मलयकेतुकटकेऽनुकूलं भविष्यति ।

सिद्धार्थकः — भदन्त, कथय कुत एतत् ।

(ख) प्रतीहारः — आर्यवसुभद्र ! क्व नु खलु भवान् प्रस्थितः ?

कंचुकी — आदिष्टोऽस्मि देव्या मित्रावसुजनन्या — "कंचुकिन् ! त्वया दशरात्रं यावन्मलयवत्या जामातुश्च रक्तवासांसि नेतव्यानि ।" राजदुहिता च श्वसुरकुले वर्तते । जीमूतवाहनः समुद्रवेलां द्रष्टुमद्य गत इति श्रूयते । तन्न जाने, किं राजपुत्र्याः सकाशं गच्छामि अथवा जामातुरिति ।

प्रतीहारः — आर्य ! वरं राजपुत्र्याः सकाशं गन्तव्यम् । तत्र हि कदचित् जामाता स्वयमेवागतो भविष्यति ।

कंचुकी — साधूक्तम् । अथ भवान् पुनः क्व प्रस्थितः ?

(ग) यूरूपीयः — किम् अपराद्धमनेन ?

राजपुरुषः — अनेन बमनामकास्त्रेण एको राजकीययूरूपीयो हतः ।

खुदीरामः — मया स तु भ्रमाद् हतः, नाहं तं हन्तुमैच्छम् ।

तद्धननं प्रति निर्दुष्टोऽस्मि ।

यूरूपीयः — कुत इदमस्त्रं शिक्षितम् ?

खुदीरामः — मयाऽन्यदेशात् शिक्षितं, शिक्षिताश्चात्रत्याः बहवः ताभिमार्णस्यायं विधिः ।

यूरूपीयः — मौनमास्ताम् । त्वदुक्तभ्रान्तौ प्रमाणाभावात् प्राणदण्डेन दण्ड्यसे ।

खुदीरामः — अनुगृहीतोऽस्मि, वन्दे मातरम् । ( राजपुरुषौ गृहीत्वा गच्छतः ) ( निष्क्रामन् )

सर्वे भवन्तो योद्धारो देशरक्षादृढव्रताः ।

वङ्गभङ्गविभेदार्थं यतन्तां बुद्धिपूर्वकम् ॥

(घ) प्रतापः — अरे धिक् माम् । यदि अहं मातृभूमिं रक्षितुं न शक्नोमि, किम् अत्र वासेन मे प्रयोजनम् , क्वचन गत्वा कथं न स्वीयान् प्राणान् सन्त्यजामि ? ( दीर्घं निःश्वसिति ) ततः प्रविशति कश्चन राजपुत्रः वीरः ।

राजपुत्रः — ( राजोचितं प्रणम्य ) विजयतां विजयतां महाराजः ।

प्रतापः — ( दीर्घं निश्वस्य मुखम् उन्नमय्य च ) हा धिक् ? विजयध्वनिं कृत्वा त्वमपि किम् एवं मां लज्जयसे भ्रातः ।

राजपुत्र: — प्राणाधार ! किम् इदं भवान् वदति ? स्वधर्माय भवता सर्वं किम् अपि कृतम् । स्वाधीनतायै सर्वं किम् अपि सोढम् । भवत: सदा विजय: एव भविष्यति ।

प्रताप: — कीदृशस्तावद् विजय: ? स्वदेशं परित्यक्तुं तु समुद्यत: अस्मि !

9. अधोलिखितेषु केषाञ्चित् **चतुर्णां** प्रश्नानामुत्तराणि संस्कृतभाषायां लिखत — $4 \times 2 = 8$

(i) 'सत्य प्रतिज्ञा हि सदा कुरूणाम्' पाठाधारेण बाणाधीना समृद्धि: केषां भवति ?

(ii) 'शकुन्तलावण्यं प्रेक्षस्व' पाठानुसारेण सर्वदमनस्य रक्षाकरण्डकं कस्मात् कारणात् परिभ्रष्टम् ?

(iii) 'गूढपत्रस्य रहस्यम्' इति पाठस्य मूलग्रन्थ: लेखकश्च लेखनीयौ ।

(iv) 'परोपकाराय शरीरलाभ:' पाठाधारेण क: कुत: उद्धृत्य अनुदिनं भुजङ्गान् आहारयति ?

(v) 'विवेकोदयम्' पाठानुसारेण संसारचक्रवाहकस्य महामोहस्य मूलं किं वर्तते ?

(vi) 'क्रान्तिकारिणां देशभक्ति:' पाठाधारेण नरेन्द्र: कथं राजकीयपुरूषै: सर्वतो रक्ष्यते ?

(vii) 'संस्थापयिष्ये मम धर्मराज्यम्' पाठानुसारेण राज्ञां परमो धर्म: क: ?

(viii) 'उदारमना भामाशाह:' पाठाधारेण आत्म-हननं केषां कर्म वर्तते ?

10. अधोलिखितेषु छन्द:सु कस्यचिदेकस्य लक्षणम् उदाहरणं च लिखत — $1\frac{1}{2} + 1\frac{1}{2} = 3$

(अ) मन्द्राक्रान्ता

(ब) वसन्ततिलका

(स) स्रग्धरा ।

11. निम्नाङ्कितेषु अलङ्कारेषु कस्यचिदेकस्य लक्षणम् उदाहरणं च लिखत — $1\frac{1}{2} + 1\frac{1}{2} = 3$

(अ) उत्प्रेक्षा

(ब) दीपकम्

(स) भ्रान्तिमान् ।